**RAMAKRISHNA MISSION VIDYAMANDIRA**

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, SEPTEMBER 2020**

**FIRST YEAR [BATCH 2019-22]**

**SANSKRIT (HONOURS)**

Date : 25/09/2020

Time : 11.00 am - 3.00 pm

**Paper : III [CC3] & IV [CC4]**

Full Marks : 25+25

# Paper : III [CC3]

1. **एकः** प्रश्नः समाधेयः । [८×१=८]

क) भट्टिकाव्यस्य द्वितीयसर्गानुसारं शरद्वर्णना कार्या ।

ख) किरातार्जुनीयानुसारं वनेचरवचनसारः समासेन लेख्यः ।

2. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्** । [६×१=६]

क) निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्यागलदच्छबिन्दुः ।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ ॥

ख) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित् ॥

3. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्** । [६×१=६]

क) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः ॥

ख) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥

4. कश्चि**देकः** सन्दर्भः वङ्गभाषया आङ्गलभाषया हिन्दीभाषया वा अनूद्यताम् । [५×१=५]

क) स्थविरः स राजा जराविलुप्तमानावमानचित्तो दुश्चरितदुहितृपक्षपाती यदेव किञ्चित् प्रलपति, त्वयापि किं तदनुमत्या स्थातव्यम् ? अविलम्बितमेव तस्य कामोन्मत्तस्य चित्रवधवार्ताप्रेषणेन श्रवणोत्सवोऽस्माकं विधेयः । सा च दुष्टकन्या सहानुजेन कीर्ति-सारेण निगडितचरणा चारके निरोद्धव्या ।

ख) चम्पेश्वरोऽपि सिंहवर्मा सिंह इवासह्यविक्रमः प्राकारं भेदयित्वा महता बलसमुदायेन निर्गत्य स्वप्रहितदूतव्राताहूतानां साहाय्यदानायातिसत्वरमापततां धरापतीनामचिर-कालभाविन्यपि सन्निधावदत्तपेक्षः साक्षादिवावलेपो वपुष्मानक्षमापरीतः प्रतिबलं प्रतिजग्राह ।

## **Paper : IV [CC4]**

5. **एकः** प्रश्नः समाधेयः । [१०×१=१०]

    क) भारतवर्षस्य समाजे साहित्ये च रामायणस्य प्रभाव आलोचनीयः ।

    ख) संस्कृतगद्यकाव्यानां संक्षिप्तपरिचयः प्रदेयः ।

6. यथेच्छं विषय**त्रय**मवलम्ब्य टीका**त्रयं** विरचनीयम् । [५×३=१५]

    क) वेदाङ्गानि

    ख) आर्यभट्टः

    ग) चरकसंहिता

    घ) श्रीमद्भगवद्गीता

    ङ) मृच्छकटिकम्

    च) चम्पूकाव्यम्

——————— × ———————